## ४४. शिल्पकारः

षष्ठी

पथिकः - भोः शिलां कुट्टयित्वा कुट्टयित्वा भवान् किंवा करोति ?

शिल्पकारः - अहं गणेशस्य विग्रहं करोमि।

पथिकः - किमर्थं भवान् शिवस्य विग्रहं न करोति ? किं भवान् गणेशस्य भक्तः ?

शिल्पकारः - शिवस्य विग्रहः लिङ्गरूपः, अतः अहं गणेशस्य विग्रहं करोमि।

पथिकः - भवान् सर्वविधान् विग्रहान् अपि करोति किम् ?

शिल्पकारः - भवते कीदृशः विग्रहः आवश्यकः ? देवस्य चेत् कस्य देवस्य ? देव्याः चेत् कस्याः देव्याः ? रामस्य लक्ष्म्याः सरस्वत्याः उत कृष्णस्य ? कस्य विग्रहः आवश्यकः ?

पथिकः - नवरात्रसमये पूजां कर्तुं लक्ष्म्याः विग्रहः आवश्यकः। तथैव पार्वत्याः (गौर्याः) विग्रहः अपि आवश्यकः।

शिल्पकारः - भवते कदा आवश्यकम् ?

पथिकः - मह्यं जुलै-मासस्य १० दिनाङ्के आवश्यकम्। कृत्वा ददाति किम् ? एकस्य विग्रहस्य कृते कति रूप्यकाणि ?

शिल्पकारः - देव्याः इति कारणतः कति रूप्यकाणि इति न वदामि। भवानेव चिन्तयित्वा ददातु।

पथिकः - अस्तु जुलै-मासस्य १० दिनाङ्के आगच्छामि।